National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2025;** 1(63): 116-119
© 2025 NJHSR
www.sanskritarticle.com

**डॉ.ख्यालानन्दः,**
सहायकाचार्यः (अतिथिः),
ज्योतिषविभागः,
श्रीसीतारामवैदिकादर्शसंस्कृतमहा-
विद्यालयः, कोलकाता

**Correspondence:**
**डॉ.ख्यालानन्दः,**
सहायकाचार्यः (अतिथिः),
ज्योतिषविभागः,
श्रीसीतारामवैदिकादर्शसंस्कृतमहा-
विद्यालयः, कोलकाता

# भारतीयज्ञानपरम्परानुसारेण संहिता-ग्रन्थोक्तः वृष्टिविचारः

**डॉ.ख्यालानन्दः**

**शोधसारः**

वस्तुतः त्रिस्कन्धात्मकं ज्योतिर्विज्ञानम्। सिद्धान्त-होरा-संहितेति त्रयः स्कन्धाः। यत्र संहितास्कन्धे विशेषतो वृष्टिविज्ञानसम्बद्धाः विचाराः प्रचुराः सन्ति। प्राचीनभारतीयसंहितासु वृष्टिः न केवलं प्राकृतिकघटना इति स्वीक्रियते, अपि तु सा ऋतुचक्रस्य, कृषेः, पर्यावरणस्य मानवस्वास्थ्यस्य च अविच्छिन्नकारणरूपेण विवेच्यते। चरकसंहिता-सुश्रुतसंहिता-काश्यपसंहितादिषु आयुर्वेदग्रन्थेषु वृष्टेः वर्णनं ऋतुचर्याविधानस्य, जनपदोध्वंसनिदानस्य तथा रोगोत्पत्तिहेतूनां सन्दर्भे विशदतया उपलभ्यते। तत्र कालदेशवायुमेघसूर्याणाम् असामान्यावस्थायां अतिवृष्टिः, अनावृष्टिः अथवा विषमवृष्टिः जायते, येन दोषप्रकोपः जनस्वास्थ्ये च व्यापकः प्रतिकूलप्रभावः सम्भवति। चरकसंहितायां वृष्टिः अन्नोत्पत्तेः जीवनधारणस्य च मूलाधाररूपेण निरूपिता अस्ति, अपि च सुश्रुतसंहितायां वर्षाप्रभावेण जलभूम्यौषधीनां गुणपरिणामपरिवर्तनं विवेचितम्। एवम् अयं संहितोक्तः वृष्टिविचारः प्राचीनभारतीयपर्यावरणचेतनां, जलविज्ञानदृष्टिं तथा समग्रस्वास्थ्यदर्शनं सम्यक् प्रतिबिम्बयति। वर्तमानपर्यावरणसंकटस्य सन्दर्भे अयं विषयः अत्यन्तं प्रासंगिकः अनुसन्धानयोग्यश्च वर्तते।

**वृष्टियोनिः**

ज्योतिषशास्त्रस्य संहितास्कन्धः सर्वाधिकं लोकोपकारकं वर्त्तते। लोकोपकारकं दृष्ट्वा वी.वी.रमनमहाभागेन प्रोक्तं यत् संहिता विश्वस्य विज्ञानम् अर्थात् Samhita is the Science of World इति। संहिताशास्त्रोक्ता प्रक्रिया समस्तभूमण्डलस्योपरि सञ्जातग्रहप्रभावस्य मूल्याङ्कनं करोति। सकलेयं धरा मृतिकादिनवखण्डेषु विभज्य तत्तद्भूभागस्य तत्तत्सम्बन्धिनि नक्षत्राणि प्रतिनिधिकारकरूपाणि भवन्ति। तन्नक्षत्राधारेण भूमण्डलस्य स्थितिं ज्ञातुं शक्यते। तत्र अनावृष्टिरतिवृष्टि-भूकम्पोत्पातादयो ज्ञायन्ते, येषां प्रभावोऽस्माभिः प्रत्यक्षतया अनुभूयते।

संसारस्य प्राणोऽन्नमस्ति। तदन्नं वर्षर्तोरधीनः वर्त्तते। अतः यत्नपूर्वकं वर्षर्तोः परीक्षा कर्त्तव्या।[1] यदा सूर्यः शीतकाले समुद्रमुपरि तिष्ठति तदा स स्वीयकिरणैः समुद्रस्य जलमुष्णं कृत्वा तस्य भारं न्यूनं करोति। जलस्य अल्पभारत्वात् सूर्यः स्वस्य किरणैस्तं जलं धारयति। जलमिदं सूर्य आकाशे विस्तारयति। एवमाकाशे सूर्यविस्तारितमिदं जलं नवमासानन्तरम् अर्थात् चातुर्मासे प्रवर्षति। शास्त्रेषु सूर्यं गर्भकर्त्तापुरुषरूपे स्वीकृत्य आकाशरूपीस्त्रीद्वारा जलस्य प्रसव उक्तम्। तद्यथा-

**नवमासधृतं गर्भं भास्करस्य गभस्तिभिः।**
**रसं सर्वसमुद्राणां द्यौः प्रसूते रसायनम्॥**[2]

मेघानां गर्भधारणसन्दर्भे पुरातनेष्वाचार्येषु मतान्तरमस्ति। यथा आचार्यसिद्धसेनः अस्मिन् सन्दर्भे वदति यत्- कार्तिकमासस्य शुक्लपक्षस्य समाप्त्यनन्तरं मेघेषु गर्भधारणम्भवति।[3] आचार्यवराहमिहिरानुसारेण ज्येष्ठ-शुक्लपक्षाष्टमीतिथितः चतुर्दिनपर्यन्तं गर्भधारणस्य दिनानि भवन्ति। एतेषु दिनेषु सुखदिक्स्पर्शेभ्यः (पूर्वेशानोत्तरेभ्यः) जन्यानि वायुर्निर्मलमेघयुक्ताकाशादिनि लक्षणानि शुभानि भवन्ति। तद्यथा -

**ज्यैष्ठसितेऽष्टम्याद्याश्चत्वारो वायुधारणा दिवसाः।**

**मृदुशुभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च॥**[4]

यदि ज्येष्ठमासस्य शुक्लपक्षे स्वाती-विशाखा-अनुराधा-ज्येष्ठानक्षत्रेषु वृष्टिर्भवति, तदा क्रमेण श्रावण-भाद्रपद-आश्विन-कार्तिकमासेषु अवृष्टिर्भवति। यदि चतुर्षु गर्भधारणदिनेषु आकाशस्य लक्षणानि समानानि भवेयुः, तदा शुभम्भवति, एवमसमाने सति क्रमानुसारेण भयप्रदायकाः भवन्ति।[5] वसिष्ठमुनेर्मतानुसारेण यदि गर्भधारणस्य दिने विद्युत्-जलकणाः, धूलिकणयुक्तवायुः, मेघाच्छन्नौ रविचन्द्रौ स्याताम्, एवञ्च उत्तरेशानौ वा पूर्वदिक् विद्युद्युता स्यात्तदा सर्वेषां धान्यानां वृद्धिर्भवति। धूलिवृष्टिः, जलं, मेघानां शोभनाश्चेष्टा, खगानां मधुरस्वरः, मृत्तिकायां जले वा खगानां क्रीडा, स्निग्धः, सघनः, प्रदक्षिणक्रमाच्च मेघः (पूर्वतः दक्षिणे, दक्षिणतः पश्चिमे, पश्चिमादुत्तरे उत्तराच्च पूर्वे) यदि गर्भधारणस्य दिने भवति, तदा शुभम् एवञ्च सर्वधान्यानां वृद्धिकर्त्ता भवति।[6] मेघधारणविषये `डाक' उपनाम्ना प्रसिद्धा मैथिलीभाषायामुक्तिः दर्शनीया वर्तत्ते। यथा-

**पूसक अन्हरिया जतदिन मेघ, साओन सुदि तत दिन जल देह।**
**माघसूदि जतदिन मे जान, साओन वदि तत दिन वर्षा मान॥**
**माघवदि में मेघ देखाय, भादव सुदि तत वर्षा आय।**
**फाल्गुनसुदि जे बादर देख, भादववदि मे डाककलेख॥**
**फाल्गुनवदिमेमेघदेखाय, आसिनसुदिततवर्षाजान।**
**चैत सुदि जे मेघ लाग, आसिन वदि कातिक सुदि मे भाग॥**
**जेठ सुदि अष्टमी से देख, चारिदिन मन्द सायुक लेख।**
**गगन सुन्दर घन देखल जारा, मेघ गर्भ कहहु डाक बुझाय॥**[7]

गर्ग-काश्यप-वराहमिहराद्याचार्याणां मतानुसारेण मार्गशीर्ष-मासस्य शुक्लप्रतिपदातः यदा चन्द्रः पूर्वाषाढानक्षत्रे स्थितो भवेत् तस्मात्कालाद् गर्भस्य लक्षणं ज्ञातव्यम्।[8] संसारस्य प्राणोऽन्नमस्ति, तदन्नं वृष्टेरधीनमस्ति। बृहत्संहिताया कथनं स्मृतिकारः भगवान् मनुः पुष्टं कुर्वन् वदति- अग्नौ स्थापितामाहूर्तिं सूर्यः प्राप्नोति तथा सूर्यात् वर्षा भवति। वर्षातः अन्नं तथा अन्नात् प्रजायाः पालनं भवति। कथनस्याशयोऽयमस्ति यदग्नौ स्थापिता आहूतिरुष्णत्वाद् विषकलिता भवति। अर्थात् तस्य वस्तोः प्रत्येकं परमाणुः पृथक्-पृथग् भवति। सूक्ष्मत्वात् सूर्यः स्वकिरणैः तान् कणान् उत्थापयति। एवं वृष्ट्या अन्नं जायते, अन्नेन च प्रजा जीविता भवति। विज्ञानमिदमभिलक्ष्य भगवान् मनुर्वदति।[9] एवमेव गीतायामपि उक्तम।[10] आदिकविः वाल्मीकिरपि कथयति यत् यथा स्त्रिया उदरे विद्यमानो गर्भः समये प्रसूतो भवति, तथैव द्यौरूपीस्त्रिया उदरे सूर्यकिरणैर्गर्भः नवमासानन्तरं प्रसूतो भवति। अस्य प्रसवकालमेव वर्षर्तुः चातुर्मासः वोच्यते। अयमेव भावः ब्रह्म-विष्णुपुराणयोरपि विद्यते।[11] सूर्यः स्वकिरणैः नदी-समुद्र-पृथिवी-प्राणीनां शरीरस्थ इति चतुर्विधजलस्य ग्रहणं करोति।[12] आकाशः चन्द्रेण वायु-श्वेतमेघ-विद्युद्गर्जनाल्पवृष्ट्यादिभिर्गर्भधारणं करोति, अर्थात् एतेषां पञ्चलक्षणानाम् आकाशे दृष्टे सति गर्भधारणं ज्ञायते। एतेषु पञ्चलक्षणेषु यावान्न्यूनानि लक्षणानि विद्यन्ते तावदेव न्यूनो गर्भो भवति।[13] चन्द्रमा सोमकारणात् शीतप्रकृतिवान् अस्ति। यस्मिन् नक्षत्रे सूर्यस्य रश्मिभिर्जलमाकाशे गच्छति, तस्मिन्नेव नक्षत्रे यदि चन्द्रोऽपि अस्ति तदा तज्जलं तस्मादेव शीतप्रभावात्तत्र एव स्थिरं भवति, इदमेव गर्भधारणमुच्यते। एतद्विपरीतं सूर्यचन्द्रयोर्मध्ये यदि अग्निसम्बन्धितो ग्रहः यथा भौमः, वायुसम्बन्धितो ग्रहः यथा शनिः आगच्छति तदा चन्द्रः तं गर्भं धारयितुं समर्थो न भवति। यतस्तु अग्नि-वायुभ्यां सम्बन्धितग्रहाणां कारणात्तस्य प्रभावो न्यूनो भवति। यदि तस्मिन् समये गर्भः स्थितो भवति तदा केषाञ्चन दिनानामनन्तरं तस्य गर्भस्य पातो भविष्यति। उपर्युक्तविवेचनात् सिद्धं भवति यत् आचार्यवराहमिहिरस्य सिद्धान्तमध्ये एवञ्च 'डाक' नाम्ना प्रसिद्ध-मैथिलीलेखकस्य उक्तिर्मध्ये साम्यता वर्त्तते। यदि कथ्यते यत् सामान्यं ग्रामीणं कृषकवर्गमभिज्ञानाय तेषां भाषायां संस्कृतस्य रूपान्तरमस्ति, तर्हि कथनमिदमनुचितं नास्ति। उपर्युक्त विवेचनात् स्पष्टमस्ति यत् ग्रामे अद्यापि शास्त्रपद्धत्या वर्षानुमानस्य प्रविधिः प्रचलति।

**<u>गर्भोपक्रमकालः</u>**

कस्मान्मासात् शीतकालः कस्मान्मासाच्च उष्णकालो वर्षाकालो वा मन्येदस्मिन् विषये विभिन्नानि मतानि प्रचलितानि सन्ति। सामान्यतः शीतकालं मेघगर्भधारणस्य, उष्णकालं दोहदस्य (गर्भपोषणस्य) एवञ्च वर्षाकालं प्रसवस्य कालः मन्यते। केषाञ्चन विद्वन्मतानुसारेण मार्गशीर्षमासतः फाल्गुनमासपर्यन्तं शीतकालः, चैत्रतः आषाढमासपर्यन्तम् उष्णकाल एवञ्च श्रावणमासाद् कार्तिकमासपर्यन्तं वृष्टिकालो भवति। सम्प्रति कार्तिकात् माघमासपर्यन्तं शीतकालः, फाल्गुनात् ज्येष्ठमासपर्यन्तम् उष्णकालः तथा च आषाढमासादाश्विनमासपर्यन्तं वर्षाकालः मन्यते।[14] एवं मासस्य निर्धारणं चान्द्रमासेन कृतं परञ्च मासानां प्रमाणं सौरमासेन एव भवति इति प्रायशः मान्यता ज्योतिषशास्त्रे प्रचलति। यतस्तु चान्द्रमासे अधिमासादयः मध्ये निपतन्ति। ऋतूनां निर्धारणं सौरमासेन एव भवति। अत्र चान्द्रमासं गृहीत्वा सूर्यचन्द्रादिग्रहाणां नक्षत्रभ्रमणकारणाद् वृष्टेर्गर्भधारणस्य वर्णनं विद्यते। मासनिर्धारणं सौरमासेन एव भवति। तद्यथा-

**सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।**

**त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः।।**[15]

सर्वव्यापकः सूर्यः सप्तरश्मिभ्यः रसं स्वीकुर्वन् सप्तर्षिभिः स्तूयमानः गच्छति। ग्रीष्म-वर्षा-हेमन्तनाभियुक्तः, अजीर्णः तथा च न कस्मिंश्चित् आश्रितः संम्वत्सरः अस्ति। सर्वे लोकाः सूर्ये एव स्थितास्सन्ति। मन्त्रेऽस्मिन् रथस्य सप्ताश्वाः प्रकाशस्य द्योतकाः विद्यन्ते, ये वस्तुतः एकस्मिनेव वर्णे सूर्यस्य प्रकाशरूपे दृश्यन्ते।

चक्रस्य तिस्रः नाभयः सौरवर्षस्य चक्रस्य त्रयः मुख्या ऋतवः सन्ति। सूर्यः स्वकीयाकर्षणशक्त्या ग्रहान् स्व-स्व कक्षायां स्थापितवान्। ग्रीष्म-शीत-वर्षाः त्रय ऋतवः सन्ति। एतेषु मध्यमे त्रय ऋतवोऽन्या अपि सन्ति, तस्मात् षड् ऋतवो मन्यन्ते। वेदारण्यकब्राह्मणादिपुरातनेषु ग्रन्थेषु षड्-ऋतूनामुल्लेखः प्राप्यते। शतपथब्राह्मणे त्रयाणां ऋतूनां नामानि प्राप्यन्ते। तैत्तरीयब्राह्मणे पञ्च-ऋतूनां नामानि प्राप्यन्ते। यथा- **पञ्च वा ऋतवः संवत्सरः।** अत्र संवत्सरपदस्य अर्थोऽस्ति- वर्षः। **संवसन्ति ऋतवः यस्मिन् स संवत्सरः।** अर्थाद् यस्मिन् ऋतवः निवसन्ति स संवत्सर उच्यते। तैत्तरीयब्राह्मणे पञ्चऋतुषु वसन्तः, ग्रीष्मः, वर्षाः, शीत इति चत्वारः पञ्चमं हेमन्त-शिशिरयोः संयुक्तं रूपमस्ति। ऐतरेयब्राह्मणे यथा- **"द्वादशमासा पञ्चर्तवः हेमन्तशिशिरसमासेन।"** वेदाङ्गज्योतिषे मुख्यतः षड् ऋतव एव मन्यते। वर्षस्य द्वादशमासेषु तेषां विभाजनमाचार्यैः कृतम्। तद्विभाजनविषये यजुर्वेदे उक्तम्।[16] यजुर्वेदे वर्णिताः वैदिकाः सौरमासाः सन्ति। तद्यथा-

| | | | | | |
|---|---|---|---|---|---|
| मधु-माधवयोः | शुक्र-शुच्योः | नभ-नभस्ययोः | इष-ऊर्जयोः | सह-सहस्ययोः | तप-तपस्ययोः |
| वसन्तर्तुः | ग्रीष्मर्तुः | वर्षर्तुः | शरदर्तुः | हेमन्तर्तुः | शिशिरर्तुः |

मधुसूदनओझावर्यानुसारेण शीतकाले गर्भधारणं भवति, तदनन्तरमुष्णकाले तस्य पोषणम् एवं वर्षाकाले तत् जलं प्रवर्षति।[17] कस्यचन अभिमतमस्ति यद् ज्येष्ठानक्षत्रस्य निकटं यदा अमावस्या भवति तदा गर्भकालो भवति। यदा च "ज्येष्ठा" नक्षत्रस्य निकटं पूर्णिमा भवति तदा प्रसवकालोऽर्थात् वर्षाकालो भवति।[18] प्रायशः मार्गशीर्षस्य अमावस्यां तथा च ज्येष्ठमासस्य पूर्णिमां ज्येष्ठानक्षत्रमायाति। कस्यचन अभिमतमस्ति यत् मूलनक्षत्रस्योत्तरार्द्धे सूर्यास्यागमने सति गर्भकालः तथा च आर्द्रानक्षत्रे सूर्यस्य विद्यमाने सति प्रसवकालो भवति। अर्थात् मूलनक्षत्रे यदा सूर्यः भवति, तत्षड्दिनानन्तरं चतुर्मासपर्यन्तं गर्भकालः। अथ च आर्द्रानक्षत्रे यदा सूर्यः भवति तदारभ्य चतुर्मासपर्यन्तं प्रसवकालो भवति।[19] मूल-नक्षत्रे सूर्यः पौषमासे आर्द्रा-नक्षत्रे च सूर्यः आषाढमासे भवति, एवञ्च मध्यममानात् सूर्य एकस्मिन् नक्षत्रे त्रयोदश-दिनानि, विंशति-होरापर्यन्तं तिष्ठति। केषाञ्चन विद्वज्जनानाम् अभिमतमस्ति यत् यस्मात्पातात् सूर्यः दक्षिणायने भवेत्तद्गर्भकालस्यारम्भः, यस्मात्पाताच्च सूर्य उत्तरायणे भवेत् स कालः प्रसवकाल इति। गर्भकालस्य प्रारम्भिकदिनसन्दर्भे केषाञ्चन अभिमतमस्ति यत्-

➢स्वाति-नक्षत्रे सूर्यस्य स्थिते सति गर्भकालस्य प्रारम्भो भवति।
➢स्वाति-नक्षत्रे चन्द्रस्य स्थिते सति गर्भकालस्य प्रारम्भो भवति।
➢अश्विनी-नक्षत्रे चन्द्रस्य स्थिते सति गर्भकालस्य प्रारम्भो भवति।
➢अनुराधा-नक्षत्रे सूर्यस्य स्थिते सति गर्भकालस्य प्रारम्भो भवति।
➢मूल-नक्षत्रे सूर्यस्य स्थिते सति गर्भकालस्य प्रारम्भो भवति।

एतेषु पञ्चसु मूलार्कादुत्तरस्य दृढफलं पूर्वस्य च मन्दफलं भवति।[20] आचार्यसिद्धसेनस्य अभिमतमस्ति यत् कार्तिकशुक्लपूर्णिमातिथि-रनन्तरं गर्भस्य दिनानि भवन्ति।[21] एतद्विपरीतं गर्गाद्याचार्याणां मतमनुसरन् आचार्यवराहमिहिरस्य अभिमतमस्ति यत् मार्गशीर्ष-शुक्लप्रतिपदातः यदा चन्द्रः पूर्वाषाढानक्षत्रे स्थितो भवति, तस्मात् कालात् गर्भस्य लक्षणं विज्ञेयम्। यथा-

**मार्गशिरः सितपक्षप्रतिपत्प्रभृतिक्षपाकरेऽषाढाम्।**
**पूर्वां वा समुपगते गर्भाणां लक्षणं ज्ञेयम्॥**[22]

अपि च-

**दैवविदविहितचित्तोद्युनिशं यो गर्भलक्षणे भवति।।**
**तस्य मुनेरिव वाणी न भवति मिथ्याम्बुनिर्देशे।**

अर्थात् यो दैवज्ञः पुरुषः दिवारात्रौ गर्भलक्षणकरणे प्रयासरतो भवति, तस्य वाक् कदापि मिथ्या न भवति। अतः गर्भस्य परीक्षायाः परिज्ञानमत्यावश्यकमस्ति। आचार्येण गर्भधारणविषये निरूपितं यत् मार्गशीर्षमासे शुक्लपक्षस्य प्रतिपदायां यस्मिन् दिवसे चन्द्रः पूर्वाषाढानक्षत्रे भवेत्तस्माद् दिनात्सर्वविधानां गर्भाणां लक्षणानि ज्ञातव्यानि। चन्द्रः यस्मिन् नक्षत्रे स्थितः भवेत्, तस्मिन् नक्षत्रे यदि गर्भधारणं भवति, तदा तस्मात् नक्षत्रात् शताधिकपञ्चनवतिः (195) दिवसानन्तरं प्रसवकालो भवतीति।[23]

**<u>निष्कर्षः</u>**

भारतीयज्ञानपरम्परायां संहिताग्रन्थेषु प्रतिपादितं वृष्टिविचारं सम्यगवलोकयन् एतद् स्पष्टं भवति यत् प्राचीनभारतीयमनीषिभिः वृष्टिः केवलं प्राकृतिकघटना इति न मन्यते स्म, अपि तु सा ब्रह्माण्डीयदैवीनैतिकपर्यावरणीयसन्तुलनेन सह सम्बद्धा प्रक्रिया इति अवगम्यते स्म। ऋग्वेदे, यजुर्वेदे, अथर्ववेदे, बृहत्संहितायां, नारदसंहितायां, वराहसंहितायां च वृष्टेः कारणानि, प्रकाराः, कालः, प्रमाणं तथा प्रभावाश्च सूक्ष्मतया सुव्यवस्थितरूपेण विवेचिताः सन्ति।

संहिताग्रन्थेषु वृष्टिः यज्ञेन, धर्मेण, ऋतुचक्रेण, ग्रह-नक्षत्रगतिभिः तथा वायुमण्डलीयपरिवर्तनैः सह सम्बद्धा इति प्रतिपाद्यते, येन भारतीयपरम्परायां खगोल-भूगोल-मौसमविज्ञान-कृषिशास्त्राणां समन्वितदृष्टिः विकसितेति सिद्ध्यति। विशेषतः ग्रह-नक्षत्रसंयोगैः, मेघलक्षणैः, वायुप्रवाहैः तथा जीवजगत्सूचनैः आधारेण वृष्टिपूर्वा-नुमानपरम्परा प्रचलिता आसीत्, या तत्कालीनवैज्ञानिकचेतनायाः प्रमाणं भवति।

अतः एव वक्तुं शक्यते यत् संहिताग्रन्थेषु निहितो वृष्टिविचारः केवलं धार्मिकः आस्थाप्रधानो वा नास्ति, अपि तु तस्मिन् व्यावहारिकाः,

पर्यावरणीयाः तथा वैज्ञानिकतत्त्वानि अपि समाहितानि सन्ति। आधुनिकजलवायुसङ्कटस्य तथा अनिश्चितमानसूनस्य पृष्ठभूमौ एषा ज्ञानपरम्परा मानवप्रकृत्योः सामञ्जस्यपूर्णसम्बन्धस्य प्रेरणां ददाति, तथा समकालीनपर्यावरणीयाध्ययनाय अपि उपयोगिनी भविष्य-तीति।

**"।।इत्यलं विस्तरेण।।"**

**संकेताक्षरसूची**

1. अ. : अध्याय:
2. का. : कादम्बिनी
3. ग. : गर्भ:
4. धा. : धारण
5. बृ. : बृहत्संहिता
6. मा. : मास:
7. यजु. : यजुर्वेद:
8. ल. : लक्षण
9. श्लो. : श्लोक:

**सन्दर्भग्रन्थसूची**

1. अथर्ववेदसंहिता-रामस्वरूपशर्मा गौड, चौखम्बा सुरभारती प्रकाशन्, प्रथमसंस्करण, 1990
2. ऋग्वेदसंहिता-पं. राम गोविन्द त्रिवेदी, चौखम्बा सुरभारती प्रकाशन, प्रथमसंस्करण, 1990
3. कादम्बिनी-डॉ. गणेशीलालः सुथारः, एवरग्रीन प्रिण्टर्स, जोधपुर, 2003
4. कृषिपराशर:-प्रो. रामचन्द्रपाण्डेय:, मोतीलाल-बनारसीदास, बंगलो रोड, दिल्ली, प्रथमसंस्करण- 2002
5. घाघ-भड्डरी की कहावतें-पं.रामलग्नपाण्डेय,प्रकाशन-रूपेशठाकुर प्रसाद, वाराणसी
6. बृहत्संहिता-पं. अच्युतानन्द झा, चौखम्बा संस्कृत सीरीज वाराणासी, 1998
7. भारतीयवृष्टिविज्ञानपरिशीलन-प्रो.देवीप्रसादत्रिपाठी,प्रकाशन-श्रील.ब.शा. रा.सं.वि.नई दिल्ली, 201

**सन्दर्भ ग्रन्थ:**

[1] अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम्। यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन॥ बृ.ग.ल.अ.श्लो.- 1

[2] का.ग.ल.अ.श्लो.- 9

[3] शुक्लपक्षमतिक्रम्य कार्तिकस्य विचारयेत्। गर्भाणां सम्भवं सम्यक्सस्य सम्पत्तिकारणम्॥ बृ.ग.ल.अ.श्लो.- 5

[4] बृ.ग.धा.अ.श्लो.- 1

[5] बृ.ग.धा.अ.श्लो.- 2, 3

[6] बृ.ग.धा.अ.श्लो.- 4-8

[7] उद्धृत- भा.वृ.वि.परि.पृ. – 67

[8] बृ.ग.ल.अ.- 6

[9] अग्नौ प्रास्ताहुतिःस्म्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततःप्रजाः॥ का.ग.अ.श्लो.- 8

[10] अन्नाद्भवन्ति भूतानि, पर्जन्यादन्नसम्भवः। गीता- 3/14

[11] का.ग.अ.श्लो.- 10-14

[12] सरितसमुद्रभूमिस्थास्तथापःप्राणिसम्भवाः।

[13] चन्द्राद्यौर्गर्भमाधत्ते वातेनाभ्रेण विद्युता। गर्जितानाल्पवृष्टया च स गर्भः पञ्चलक्षणः॥ का.मा.अ.श्लो.- 15

[14] मार्गशीर्षात् ततश्चैत्राच्छ्रावणाच्च पुरा क्वचित्। शीतोष्णवर्षा कालानां चातुर्मास्यानि चक्षते। कार्तिकात् फाल्गुनात् तद्वदाषाढात्प्रतिभान्ति तु। शीतोष्णवर्षा कालानां चातुर्मास्यानि सम्प्रति॥ का.मा.अ.श्लो.- 16-17

[15] ऋग्वेदः- 1-164.21

[16] मधुश्च माधवश्च वसन्तिकावृतूशुक्रश्च शुचिश्च ग्रैष्मावृतू। नभश्च नभस्यश्च वार्षिकावृतूइषश्चोर्जश्च शारदावृतू। सहश्च सहस्यश्च हेमन्तिकावृतूतपश्च तपस्यश्च शैशिरोवृतू।। यजु.- 13/25

[17] का.ग.अ.श्लो.- 18

[18] का.ग.अ.श्लो.- 19

[19] का.ग.अ.श्लो.- 20

[20] का. 21-23

[21] शुक्लपक्षमतिक्रम्य कार्तिकस्य विचारयेत। गर्भाणां सम्भवं सम्यक् सस्यसम्पत्तिकारणम्॥ बृ.ग.ल.अ.श्लो.- 5

[22] बृ.ग.ल.अ.श्लो.- 6, अपि च- शुक्लादौ मार्गशीर्षस्य पूर्वाषाढाव्यवस्थिते। निशाकरे तु गर्भाणां तत्रादौ लक्षणं वदेत्॥

[23] यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत्स चन्द्रवशात्। पञ्चनवते दिनशते तत्रैव प्रसवमायाति।। बृ.